कुष्टपामाकृमिहरं वातश्लेष्मामयापहं ॥ अथ सर्वतैलगुणाः ॥ तैलं स्वयोनिगुणकृत् वा
२२४ ग्भटेनाखिलं महत् ॥ अतः शेषस्य तैलस्य गुणाः ज्ञेयाः स्वयोनिवत् ॥ इति भावप्रकाशे तै
लवर्गः ॥ अथ संधानवर्गः ॥ तत्र कांजिकस्य लक्षणं गुणाश्च ॥ संहितं धान्यमंडादि कांजि
कं कथ्यते जनैः ॥ कांजिकं भेदि तीक्ष्णोष्णं रोचनं पाचनं लघु ॥ दाहज्वरहरं स्पर्शात्पानाद्वा
तकफापहं ॥ माषादिवटकैर्यत्तु क्रियते तद्गुणाधिकं ॥ लघुवातकरं तत्तु रोचनं पाच
नं परं ॥ शूलाजीर्णविबंधामनाशनं वस्तिशोधनं ॥ अथ तुषोदकस्य लक्षणं गुणाश्च ॥ तुषोद
कं यवैरामैः सतुषैः सकलीकृतैः ॥ यवैस्तुदकेन संहितैः ॥ संधानवर्गे कृतत्वात् ॥ तुषांबु दीप
नं हृद्यं पांडुकृमिगदापहं ॥ तीक्ष्णोष्णं पाचनं पित्तरक्तकृद्बस्तिशूलनुत् ॥ अथ सौवीरस्य लक्ष
णं गुणाश्च ॥ सौवीरं तु यवैरामैः पक्वैर्वा निस्तुषैः कृतं ॥ गोधूमैरपि सौवीरमाचार्याः केचिदू
चिरे ॥ सौवीरं तु ग्रहण्यर्शः कफघ्नं भेदि दीपनं ॥ उदावर्तांगमर्दास्थिशूलानाहेषु शस्यते ॥ आ २२४
रनालस्य लक्षणं गुणाश्च ॥ आरनालं तु गोधूमैरामैः स्यान्निस्तुषीकृतैः ॥ पक्वैर्वा संहितै

नि×२

768

शांतये॥ अथ बररैतैलगुणाः॥ कुसुंभतैलमम्लं स्वादुष्णं गुरु विदाहि च॥ चक्षुर्भ्याम
हितंवल्यंरक्तपित्तकफप्रदं॥ अथ खसबीजतैलगुणाः॥ [illegible] ॥तैलंतुखसबीजा
कृत नांबल्यंवृष्यंगुरुस्मृतं॥ वातघ्नंकफ[illegible]शीतंस्वादुपाकरसंचतत्॥ अथ एरंडतैलगुणाः
एरंडतैलंतीक्ष्णोष्णंदीपनंपिच्छिलंगुरु॥ वृष्यंत्वच्यंवयःस्थापिमेधाकांतिबलप्रदं॥ क
षायानुरसंसूक्ष्मंयोनिशुक्रविशोधनं॥ विस्रंस्वादुरसेपाकेसतिक्तंकटुकंसरं॥ विषम
ज्वरहृद्रोगपृष्ठगुह्यादिशूलहृत्॥ हंतिवातोदरानाहगुल्माष्ठीलाकटिग्रहान्॥ वात
शोणितविड्बंधब्रध्नशोथामविद्रधीन्॥ आमवातगजेंद्रस्यशरीरवनचारिणः॥ एक
एवनिहंतायमेरंडस्नेहकेशरी॥ अथ सालतैलगुणाः॥ तैलंसर्जरसोद्भूतंविस्फोटव्र
णनाशनं॥ कुष्ठपामाक्रिमिहरंवातश्लेष्मामयापहं॥ अथ भेलातैलगुणाः॥ भल्लाततै
लंवीर्योष्णंशोषणंव्रणकरंकटु॥ नीलाकषायंमधुरंतिक्तंश्लेष्मतृतापहं॥ कुष्ठघ्नंचत्रि
दोषास्रमेहमेदक्रिमिप्रणुत्॥ अथ सार्ज॥ तैलंसर्जरसोद्भूतंविस्फोटव्रणनाशनम्

५×४

469

न्कार्यं कुर्याद्दलाघवर्द्धनं ॥ तैलमप्युष्णं रसतो सोम्यस्तिक्तं सघ्नत्वमार्दवे ॥ तैलं त्वग्रं रसं
२१२ नेत्रं कृशानां तेन वर्द्धनं ॥ बवापि स्थूलानां तीक्ष्णं हंसरत्वेमें दसः तयं ॥ शानैः प्रकुरु
ते तैलं तेन लेखनमीरितं ॥ कृतं वरीषेव भांति स्वलिद्धं नमवर्तयेत् ॥ ग्राहकं सारकं
चापि तेन तैलमुदीरितं ॥ घृतं मध्ये तस्यं पक्वं तीनवीर्यं प्रजायते ॥ तैलं पक्वमपक्वं वा चिर
स्थायि गुणाधिकं ॥ अथ सरिसव राई तैलगुणाः ॥ दीपनं सार्षपं तैलं कटुपाकरसं ल
घु ॥ लेखनं स्पर्शवीर्योष्णं तीक्ष्णं पित्तास्रदूषकं ॥ कफमेदोनिलार्शोघ्नं शिरःकर्णामयाप
हं ॥ कंडूकोष्ठक्रिमिश्वित्रकुष्ठदुष्टव्रणप्रणुत् ॥ तद्वद्राजिकयोस्तैलं विशेषान्मूत्रकृछ्र
कृत् ॥ राजिकयोः कृष्णराई आरक्तराई द्वयोः ॥ अथ तोरीतैलगुणाः ॥ तीक्ष्णोष्णं तुव
रीतैलं लघुग्राहि कफास्रजित् ॥ वह्निकृद्विषहृत्कंडूकुष्ठकोष्ठक्रिमिप्रणुत् ॥ मेदोदो
षापहं चापि व्रणशोथहरं परं ॥ अथ अतसीतैलगुणाः ॥ अतसीतैलमाग्नेयं स्निग्धोष्णं
कफपित्तकृत् ॥ कटुपाकं सचक्षुष्यं बल्यं वातहरं गुरु ॥ मलकृद्रसतः स्वादु ग्राहि त्वग्दो २१२
षहृद्घनं ॥ बस्तौ पाने तथाभ्यंगे नस्ये कर्णस्य पूरणे ॥ अनुपानविधौ चापि प्रयोज्यं वात

अथ मानुष्यमूत्रगुणाः नरमूत्रं गरं हन्ति सेवितं तद्रसायनम् xx

स कामलापांडुरोगजित्॥ आविकं शोथगुल्मार्शोमेहदद्रूगुदापहं॥ गार्दभं ग्रहणी
मेहकुष्ठोन्मादकृमीन् हरेत्॥ औष्ट्रमुन्मादशोफार्शः क्रिमिशूलोदरापहं॥ रक्तपामाहरं
तीक्ष्णं सक्षारलवणं स्मृतं॥ गोऽजाविमहिषीणां तु स्त्रीणां मूत्रं प्रशस्यते॥ खरोष्ट्रेभनरा
श्वानां पुंसां मूत्रं हितं मतं॥ इति भावप्रकाशे मूत्रवर्गः॥ अथ तैलवर्गः॥ तत्र तैलस्य स्वरू
पनिरूपणं॥ तिलादिस्निग्धवस्तूनां स्नेहस्तैलमुदाहृतं॥ तत्तु वातहरं सर्वं विशेषात्तिल
तिल संभवं॥ अथ तैलगुणाः॥ तिलतैलं गुरुस्थैर्यबलवर्णकरं सरं॥ वृष्यं विकाशि विशदं मधु
रं रसपाकयोः॥ तैलं त्वचे बद्धविण्मूत्रं त्वग्गर्भाशयशोधनं॥ दीपनं बुद्धिदं मेध्यं व्यवायि
व्रणमेहनुत्॥ श्रोत्रयोनिशिरःशूलनाशनं लघुताकरं॥ त्वच्यं केशप्रचक्षुष्यमभ्यंगे भो पं ५
जनेऽन्यथा॥ छिन्नभिन्नच्युतोत्पिष्टमथितक्षतपिच्छिते॥ भग्नस्फुटितविद्धाग्निदग्ध
विश्लिष्टदारिते॥ तथाभिहतनिर्भग्नमृगव्याघ्रादिविक्षते॥ बस्तौ पाने च संस्कारे नस्ये
कर्णादिपूरणे॥ सेकाभ्यंगावगाहेषु तिलतैलं प्रशस्यते॥ ननु बृंहणलेखनयोः कथं
सामानाधिकरण्यमित्याह॥ रूक्षादिदुष्टपवनाः स्रोतः संकोचयेद्यदा॥ रसो सम्यग्वह
सूक्ष्मं कषायानुरसं तिक्तं वातकफापहं वीर्योष्णं हिमस्पर्शं

[illegible]

च

२५२ ष्णेश्लेष्मकृतेगदे॥ रोगेसामेविसूच्यांचविबंधेचमदात्यये॥ ज्वरेँदरुनेमंदेनसर्पिर्विकु
मन्यते॥ इति श्रीभावप्रकाशे घृतवर्गः॥ अथ मूत्रवर्गः॥ तत्र गोमूत्रस्य गुणाः॥ गोमू
त्रंकटुतीक्ष्णोष्णंक्षारंतिक्तकषायकं॥ लघ्वग्निदीपनंमेध्यंपित्तकृत्कफवातहृत्॥ शू
लगुल्मोदरानाहकंडूक्षिमुखरोगजित्॥ कलासेगदवातामबस्तिरुक्कुष्टनाशनं॥
कासश्वासापहंशोथकामलापांडुरोगजित्॥ कंडूकिलासगदशूलमुखाक्षिरोगा
न्गुल्मातिसारमरुदामयमूत्ररोधान्॥ कासंसकुष्टजठरक्रिमिपांडुरोगान् गोमू
त्रमेकमपिपीतमपाकरोति॥ सर्वेष्वपिचमूत्रेषुगोमूत्रंगुणतोऽधिकं॥ अतोऽविशेषा
त्कथनेमूत्रंगोमूत्रमुच्यते॥ अथ छागीमूत्रगुणाः॥ छागमूत्रंकटूष्णंस्यान्नाडीगर
विषापहं॥ प्लीहोदरश्वासकासशोथवर्चोग्रहापहं॥ शूलगुल्मरुजानाहकामलापां
डुरोगनुत्॥ कषायंतिक्ततीक्ष्णंचपूरणात्कर्णशूलनुत्॥ माहिषंशोथगुल्मार्शःपांडुमे २५२
हेषुयोजयेत्॥ आश्वंभेदिविशेषेणकफदद्रुक्रिमीन्जयेत्॥ आजंगुल्मविषश्वा

स्वादु वृष्यं गुरु विपच्यते ॥ अथ छागघृतगुणाः ॥ आजमाज्यं करोत्यग्निं चक्षुष्यं
बलवर्द्धनं ॥ कासे श्वासे क्षये चापि हितं पाके भवेत्कटुः ॥ अथ दुग्धघृतगुणाः ॥ घृ
तं दुग्धभवं ग्राहि शीतलं नेत्ररोगहृत् ॥ निहंति पित्तदाहास्रमदमूर्छाभ्रमानि
लान् ॥ अथ स्तनदधिजघृतगुणाः ॥ (हविः स्तनदधिजघृतगुणाः) हवि
र्स्तनदध्नोर्यत्तत्स्याद्धैयंगवीनकं ॥ हैयंगवीनं च चक्षुष्यं दीपनं रुचिकृत्परं ॥ ब
लकृद्बृंहणं वृष्यं विशेषाज्ज्वरनाशनं ॥ अथ पुराणघृतगुणाः ॥ वर्षादूर्ध्वं भवेदा
ज्यं पुराणं तत्त्रिदोषनुत् ॥ मूर्छाकुष्ठविषोन्मादापस्मारतिमिरापहं ॥ यथा यथा
खिले सर्पिः पुराणमधिकं भवेत् ॥ तथा तथा गुणैः स्वैः स्वैरधिकं तदुदाहृतं ॥ अ
थ नूतनघृतस्य विषयाः ॥ योजयेन्नवमेवाज्यं भोजने तर्पणे श्रमे ॥ बलक्षये पांडु
रोगे कामलानेत्ररोगयोः ॥ अथ घृतप्रयोगस्याविषयाः ॥ राजयक्ष्मणि बाले च वृ

२११ कफकारकं ॥ श्लेष्मलं गुरु मेदस्यं नवनीतं चिरंतनं ॥ इति भावप्रकाशे नवनीतवर्गः ॥ अथ
घृतवर्गः ॥ तत्र घृतस्य नामानि गुणाश्च ॥ घृतमाज्यं हविः सर्पिः कथ्यंते तद्गुणा
श्च ॥ घृतं रसायनं स्वादु चक्षुष्यं वह्निदीपनं ॥ शीतवीर्यं विषालक्ष्मीपापपित्ता
निलापहं ॥ अल्पाभिष्यंदि कांत्योजस्तेजोलावण्यवृद्धिकृत् ॥ स्वरस्मृतिकरं मेध्य
मायुष्यं बलकृद्गुरु ॥ उदावर्तज्वरोन्मादशूलानाहव्रणान्हरेत् ॥ स्निग्धं कफकरं
रौक्ष्यक्षयवीसर्परक्तनुत् ॥ अथ गव्यघृतस्य गुणाः ॥ गव्यं घृतं विशेषेण चक्षु
ष्यं वृष्यमग्निकृत् ॥ स्वादुपाकरसं शीतं वातपित्तविषापहं ॥ मेधालावण्यकां
त्योजस्तेजोवृद्धिकरं परं ॥ अलक्ष्मीपापरोगघ्नं वयसः स्थापकं गुरु ॥ बल्यं पवि
त्रमायुष्यं सुमंगल्यं रसायनं ॥ सुगंधं रोचनं चारु सर्वाज्येषु गुणाधिकं ॥ अथ मा
हिषघृतगुणाः ॥ माहिषं तु घृतं स्वादु पित्तरक्तानिलापहं ॥ शीतलं श्लेष्मलं २११

रक्षोघ्नं=३

मीरं ॥ अथ तक्रस्यायोग्याः ॥ नैव तक्रं क्षते दद्यान्नोष्णकाले न दुर्बले ॥ न मूर्छा
भ्रमदाहेषु न रोगे रक्तपैत्तिके ॥ अथ यवाग्वादीनां तक्रेण विशिष्टगुणाः ॥ यान्युक्ता
नि दधिभ्यः शोतक्रेण तु न कमादि शोस्ति ॥ इति भावप्रकाशे तक्रवर्गः ॥ अथ नवनीतव
र्गः ॥ तत्राद्यो गव्यनवनीतस्य गुणाः ॥ नवनीतं हितं गव्यं वृष्यं वर्ण्यं बलाग्निकृत् ॥ सं
ग्राहि वातपित्तासृक्क्षयार्शोर्दितकासहृत् ॥ तद्धितं बालके वृद्धे विशेषादमृतं
शिशोः ॥ अथ माहिषनवनीतस्य गुणाः ॥ नवनीतं माहिष्यं तु वातश्लेष्मकरं गुरु ॥
दाहपित्तश्रमहरं मेदःशुक्रविवर्द्धनं ॥ अथ पयसो नवनीतस्य गुणाः ॥ दुग्धोत्थं नवनी
तं तु चक्षुष्यं रक्तपित्तनुत् ॥ वृष्यं बल्यमतिस्निग्धं मधुरं ग्राहि शीतलं ॥ अथ सद्यःसमु
द्धृतनवनीतस्य गुणाः ॥ नवनीतं तु सद्यस्कं स्वादु ग्राहि हिमं लघु ॥ मेध्यं किंचित्कषाया
म्लमीषत्तक्रांशसंक्रमात् ॥ अथ चिरंतननवनीतगुणाः ॥ सक्षारकटुकाम्लत्वाच्छर्द्यर्शः